B663

काव्यमाला ५८.

श्रीवामनभट्टबाणविरचितं ।

शृंगारभूषणम् ।

मूल्यं ३ आणकाः ।

13-3-1911.

B663

A. Kuppuswami Aiyer.

KÂVYAMÂLÂ. 58.

THE

S'RINGÂRABHÛSHANA

OF

VÂMANA-BHATTA-BÂNA

EDITED BY

PANDIT S'IVADATTA

Head Pandit and Superintendent, Sanskrit Department,

Oriental College, Lahore,

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDÂJÎ'S "NIRNAYA-SÂGARA" PRESS.

BOMBAY.

1896.

Price 3 Annas.

PK 3591
.K244
v.58

(Registerd according to act XXV. of 1867.)

(All rights reserved by the publisher.)



काव्यमाला. ५८.

श्रीवामनभट्टबाणविरचितं

शृङ्गारभूषणम् ।

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसाददारक-
केदारनाथकृपाङ्गीकृतशोधनकर्मणा शिवदत्तशर्मणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथ-
शर्मणा च संशोधितम् ।

तच्च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१८९६

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपतेरेवाधिकारः ।)

मूल्यं ३ आणकाः ।

काव्यमाला ।

श्रीवामनभट्टबाणविरचितं
शृङ्गारभूषणम् ।

मैत्रीं येन मनोभवो विरचयन्विश्वं जयत्यञ्जसा
येनोद्दीपनकारिणा विजयते शृङ्गारनामा रसः ।
रम्या यत्किरणाश्चकोरपरिषत्सौहित्यनाडिंधमाः
सोऽयं वः सुखमातनोतु जगतामानन्दनश्चन्द्रमाः ॥ १ ॥

अपि च ।

ताराजालकचुम्ब्यमानकमलं धौतप्रवालोदरं
शङ्खान्तर्गतकूजितं शशिकलासंसक्तकालाम्बुदम् ।
शैलक्षोभवलन्मृणाललतिकं संत्रस्तविद्युल्लतं
वेलोल्लङ्घिमनोभवं विजयते वीरायितं योषिताम् ॥ २ ॥

(नान्द्यन्ते)

सूत्रधारः—(सप्रश्रयमञ्जलिं बद्ध्वा ।)

असितमलके मध्ये शून्यं नितम्बभरे घनं
मधुरमधरे मन्दं याने च तुङ्गमुरोजयोः ।
अधिकमृदुलं बाह्वोरायामशालि विलोचने
वपुरवतु वो मुग्धाक्षीणामभङ्गुरवैभवम् ॥ ३ ॥

(इति पुष्पाञ्जलिं विकीर्य नेपथ्याभिमुखमवलोक्य ।) मारिष, इतस्तावत् ।

(प्रविश्य ।)

पारिपार्श्वकः—भाव, अयमस्मि ।

---

१. द्रविडदेशविहितसंचारोऽयं शृङ्गारभूषणभाणः काव्यमालाकरावलम्बनमहोत्सवमनुभूय सार्वजनीनतां सार्वत्रिकतां च भजतामित्यादरपुरःसरमस्मत्संनिधौ श्रीमद्भिः **सुब्रह्मण्यशास्त्रिभिः** प्रेषित इति तेषामुपकारं विभ्रमः.

सूत्रधारः—मारिष, अद्य खलु चरसचरगुरोरुत्तुङ्गतुङ्गभद्रातरङ्गताल-वृन्तापनीयमानसंध्याताण्डवपरिश्रमस्य हेमगिरिकूटत्रीलाकरहेमकूटशृङ्गविहितमङ्गलायतनस्य कामागमगन्धिवामभागस्य शेखरीभूतशीतभानुशकलस्य भगवतो विरूपाक्षस्य चैत्रयात्रामहोत्सवे

रतितन्त्रदेशिकानां रतिपतिनिगमान्तवावदूकानाम् ।
वैदग्ध्यभूषणानामेषा परिषत्समागता विदुषाम् ॥ ४ ॥

तत्केनापि रूपकेण सभामिमामाराध्य सफलयिष्यामो वयं कुलक्रमागतं प्रयोगविद्यावैशद्यम् ।

पारिपार्श्वकः—यथा रोचते भरतकुलभूषणाय भावाय ।

सूत्रधारः—तत्किमिति क्रियते विलम्बः ।

पारिपार्श्वकः—भाव, कस्य पुनः कवेः कृतिमभिनीय सामाजिकमनांसि रञ्जयिष्यति भवान् ।

सूत्रधारः—(स्मरणमभिनीय ।)

सौभाग्यस्य निधिः श्रुतस्य वसतिर्विद्यावधूनां वरो
लक्ष्म्याः केलिगृहं प्रसूतिभवनं शीलस्य कीर्तेः पदम् ।
निःसामान्यविकासया कवितया जागर्ति वत्सान्वयः
श्रीमान्वामनभट्टबाणसुकविः साहित्यचूडामणिः ॥ ५ ॥

तेन कविना प्रणीतं शृङ्गारभूषणं नाम भाणं प्रयुञ्जानैरस्माभिर्नियतमावर्जितैव सभा ।

पारिपार्श्वकः—सम्यगुपन्यस्तं भावेन ।

सूत्रधारः—किं च

वाचस्तस्य कवेः प्रसन्नमधुरा दक्षाः प्रयोगे वयं
वैदग्ध्यप्रथमावतारसरणिः सामाजिकानां मनः ।
कालः कोकिलकण्ठरागविलसत्कंदर्पदर्पोदयः
शृङ्गारोऽपि रसः स एष मिलितो दिष्ट्या गुणानां गणः ॥ ६ ॥

पारिपार्श्वकः—सम्यगुपक्षिप्तं वसन्तागम इति । तथा हि ।

कुञ्जलितचूतविटपाः कोमलकलकण्ठपञ्चमप्रसराः ।
पक्ष्मलितमदनशौर्या मदयन्ति मनांसि माधवारम्भाः ॥ ७ ॥

सूत्रधारः—तर्हि नियुज्यन्तां भूमिकापरिग्रहाय भरतलोकाः ।

पारिपार्श्वकः—यदाज्ञापयति भावः । (इति निष्क्रान्तः ।)

सूत्रधारः—(सर्वतोऽवलोक्य ।) अये, मधुसमयारम्भगुम्भितामोदमुत्सवमयमिव जगदखिलमालक्ष्यते । तथा हि ।

चूताः पञ्चशरस्य बाणरचनाप्रस्तावमातन्वते
संलापान्परिचिन्वते परभृताः प्रादुर्भवत्पञ्चमाः ।
आदत्ते पवनोऽपि सौरभमयीमन्यादृशीं वासनां
पुष्पोद्भेदवतीमशोकलतिकामभ्येति पुष्पंधयः ॥ ८ ॥

(परिक्रम्यावलोक्य च ।) क एष कामिनीकुचकलशगाढाश्लेषविलिप्तकुङ्कुमवक्षःस्थलः कङ्केलिपल्लवानुकारिणा कौसुम्भेन वाससा कलितसंव्यानः कर्णपूरपदनिहितकमनीयकह्लारः करतलकलितकनकवेत्रयष्टिः कंदर्प इव मूर्तिमानित एवाभिवर्तते । य एष

विलुलिततिलकश्रीर्म्लानकर्णावतंसो
दरमुकुलितनेत्रो दर्शयन्नङ्गकेन ।
नवनखपदभागां नैशसंभोगमुद्रा-
मिह विशति विटानामग्रणीर्वेशवाटीम् ॥ ९ ॥

(निरूप्य ।) अयं खलु भागिनेयो भरतशेखरो विलासशेखरभूमिकामादायेत एवाभिवर्तते । अहमप्यनन्तरकरणीयाय सज्जीभवामि । (इति निष्क्रान्तः ।)

इति प्रस्तावना ।

(ततः प्रविशति विलासशेखरः ।)

विलासशेखरः—(विलोक्य ।) अये, प्रभातप्राया विभावरी । तथा हि ।

आकुलिततिमिरचिकुरामामीलिततारकामसौ श्यामाम् ।
अनुभूयेव श्रान्तः संप्रत्युपयाति वारुणीं चन्द्रः ॥ १० ॥

अपि च ।

अयमिह मधुपविलासी सादरमनुभूय कुमुदिनीं रात्रौ ।
आविस्मितकमलमुखीमम्बुजिनीमद्य चुम्बति प्रेम्णा ॥ ११ ॥

(परिवृत्यावलोक्य ।) अये, मार्तण्डस्य धूर्तजनाचरणसरणिवैदग्धी । एष खलु

आश्लिष्यत्यनुरागिणीं कमलिनीं गाढानुरागः करै-
रालिम्पन्हरिचन्दनेन हरितो बालातपच्छद्मना ।
आनन्दं दिवसश्रियो विरचयन्नाकृष्टरक्तांशुको
मीलत्तारकमुच्चलद्भ्रमरकं प्राचीमुखं चुम्बति ॥ १२ ॥

(स्मरणमभिनीय ।)

आघ्राय कर्णमूलं सुतनोः सुरतश्रमेण सुप्तोऽहम् ।
प्रतिबोधितः प्रभाते तारनिनादेन ताम्रचूडेन ॥ १३ ॥

तदानीं च

उन्निद्रोऽपि घनस्तनं वरतनोरालिङ्ग्य गाढं वपु-
र्निद्राशेषकषायितेन मनसा व्यामीलदर्धेक्षणः ।
अङ्गैरुत्पुलकैरनङ्गकलहव्यापारदूरालसै-
रैक्यं तादृशमन्वभूवमलकामोदेन वीतश्रमः ॥ १४ ॥

(परिक्रम्य स्पर्शसुखमभिनीय सानन्दम् ।)

विलुलितचिकुरो विलासिनीनां विदलितपङ्कजवासनासनाथः ।
अयमिह पवनः प्रभातजन्मा कलयति चेतसि कंचन प्रमोदम् ॥१५॥

(कतिचित्पदानि गत्वा सवितर्कम् ।) अये, महत्येव प्रत्यूषे गुरुतरकार्यारम्भव्यापृत इव किमित्यहं निर्गतोऽस्मि । (सस्मरणम् ।) आः, ज्ञातमेव । कामुकजनहरिणवञ्चनवागुरायाः कनकमञ्जरीदुहितुरनङ्गमञ्जर्याः प्रथमार्तवमहोत्सवं संभावयितुमुद्यतोऽस्मि । अथवा विस्मृतिशीलः खलु कामिलोकः । यतः ।

अधरयति भावमन्यं तत्तादृक्सुरतकौशलं सुतनोः ।
अनुभूयमानमिव मे संप्रति संचिन्त्यमानमपि मन्ये ॥ १६ ॥

तदहमधुना विटविदूषकपीठमर्दकसंकुलेन विविधविलासिनीवर्गेण मन्द्रतरतन्त्रीरवानुकारिकर्णहारिकलमधुरगीतेन धम्मिल्लहल्लकानुसारिमधुकरझंकाररचितमन्मथचापटंकारविभ्रमेण निरन्तरवितन्यमानमहोत्सवेन निरङ्कुशानङ्गशासनेन वेशवाटेन

प्रणयकलहं कोपोद्वेलं नियम्य विलासिनः
प्रकृतिमधुरं नर्मालापं विधाय वधूजनैः ।
दिवसमखिलं नीत्वा तां तां विलोक्य चमत्कृतां
मुदितहृदयः सायं गन्ता सखीमहमीक्षितुम् ॥ १७ ॥

(परिक्रम्याग्रतो दृष्टिं दत्त्वा ।) कैषा गाढपरिभोगशंसिना वपुषा बालातपलेखेव भासुरमधिवसति रम्यहर्म्यतलम् । तथा हि ।

नखपदविषक्तमलकं विमोचयन्ती विमुक्तसीत्कारम् ।
सुरतपरिश्रमखिन्ना सुतनुरियं सौधमध्यमध्यास्ते ॥ १८ ॥

एषा खलु मन्दारिकादुहिता मलयवती । तदेनामुपसृत्य संलापयिष्ये । (तथा कृत्वा ।) अयि मलयवति,

जातश्चेतिमपल्लवं शशिकलासंनद्धमुक्तावली
म्लाने चम्पकमालिके मणिगणव्यासङ्गिनौ दर्पणौ ।
मात्राधिक्यजुषानिलेन कलशद्वंद्वं च कम्पोत्तरं
क्लान्तं व्योम च कस्य वा सुकृतिनः शंसन्ति भाग्योन्नतिम् ॥ १९ ॥

किं ब्रवीषि—'भाव, किं न जानासि गन्धसारम्' इति । (सश्लाघम् ।) साधु रे गन्धसार, साधु । ईदृशभाग्यानुभवभाजनं भवानेव धन्यः । सखि मलयवति, इयमाशीः ।

ईदृशं प्रेम युवयोरेव मन्येऽन्यरागिणोः ।
अनन्यपरतन्त्रेण रतितन्त्रेण वर्धताम् ॥ २० ॥

किं ब्रवीषि—'किमन्यतो गन्तुमभिलषति भावः' इति । भवत्वेवम् । पूर्वेद्युः प्रत्यूषवेलायामेव सख्याः कनकमञ्जर्या दुहितुरनङ्गमञ्जर्याः प्रथमार्तवमहोत्सवं संभावयितुं निमन्त्रितोऽस्मि । आस्ख । (इति परिक्रम्यान्यतोऽवलोक्य ।) एषा खलु कलावतीदुहिता कमलवती भवनवेदिकामधिवसति ।

स्मरमृगयुवागुराभानसितानवकीर्य नखमुखैरलकान् ।
तरुणजनहृदयहरिणान्निसर्गतरलान्गृहीतुमुद्युङ्क्ते ॥ २१ ॥

तदेनामुपसर्पामि । (तथा कृत्वा ।) सखि कमलवति,

परिदर्शितचारुबाहुमूलं प्रकटालक्षितनव्यभोगचिह्नम् ।
कचसंयमनच्छलेन कान्ते मनसः संयमनं ममातनोषि ॥ २२ ॥

किं ब्रवीषि—'भवानेव जानाति चाटुवैदग्ध्यम्' इति । (सस्मितम् ।) शृणु तन्वि,

आमण्डलीकृतकुचं परिरभ्य दोर्भ्यां
आघ्राय कण्ठमगुरुद्रवरञ्जितं ते ।
बिम्बाधरं विहसितामरलोकसार-
मास्वाद्य रन्तुमभिलष्यति मेऽन्तरात्मा ॥ २३ ॥

किं ब्रवीषि—'धूर्त, निगूढं भण । अन्तरास्ते माधवगुप्तः' इति । (विहस्य ।) किं मलयगुप्तो निष्कासितः । अथवा किमसुलभं जननीपिशाचिकायां जीवन्त्याम् । तथा हि ।

रसज्ञलोकैरभिनन्दितानां वाराङ्गनाचन्दनवल्लरीणाम् ।
मुहुर्वमन्त्यो गरलं मुखेन स्वमातरः कालभुजङ्गच एव ॥ २४ ॥

अपि चायमाजन्मसिद्धः स्वभावः ।

तरुणं वा ललितं वा गुणोन्नतं वा कुलप्रसूतं वा ।
अपहाय मातृलोको धनिनं यं कंचिदेव कामयते ॥ २५ ॥

किं ब्रवीषि—'किमस्त्यविदितं भावस्य' इति । (सोत्प्रासम् ।) सखि, ते हितमुपदिशामि मातृगृहानुसरणमुन्मुच्य नवनवसंपन्नलावण्यं सफलीकुरुष्व तारुण्यम् । आस्व । साधयामि । (इति परिक्रामितकेनान्यतो दत्तदृष्टिः ।) अत्र हि

कण्ठैर्मञ्जुलनिनदैः साकं सौधे निलीय दयिताभिः ।
कुर्वन्त्यमी कपोताः कूजव्याजेन मणितरणितानि ॥ २६ ॥

(अन्यतोऽवलोक्य ।) क एष गाढतरताम्बूलकृष्णिकालंकारिताधरदलाति-

व्यक्तदशनक्षतः करपदमुद्राङ्कितकर्णबाहुमूलः कामिनीकुचकलशहरिद्राद्रवरञ्जितोपसंवीतस्तिष्ठति । (सविमर्शम् ।) एष खलु माधवसूनुर्मन्दारको नाम विप्रविटः पितुरध्वरार्थनिहितानि धनान्यपहृत्यानङ्गसत्रे दीक्षितवान् । भवतु । एनं तावत्परिहासभाजनं विधास्यामि । (उपसृत्य ।) सखे मन्दारक, साधु कृतं भवता । यतः ।

रम्भाभोगसुखं महाक्रतुकृतां स्वर्गे भवेदित्यहो
वाचा केचन मोहिता विदधते यागेन वित्तव्ययम् ।
कन्दर्पाध्वरदीक्षितेन भवता द्रव्यं स्वपित्रार्जितं
कान्ताश्लेषमहोत्सवोऽयमधुना निर्विघ्नमासाद्यते ॥ २७ ॥

अपि च ।

अकृताधरबिम्बचुम्बनानामनभिज्ञातनखाङ्कसीत्कृतानाम् ।
अवधूतनिषेधगर्भवाचामसिपात्रं नकुलाङ्गनारतानाम् ॥ २८ ॥

किं च वयस्य, ते हितमुपदिशामि । किं ब्रवीषि—'त्वदृते को मे हितमुपदेक्ष्यति' इति । शृणु तावत् ।

वामाङ्गे वदनेऽपि वक्षसि विभोरव्याहतप्रक्रमा-
माज्ञां शम्बरशासनस्य यदमी देवास्त्रयो बिभ्रति ।
कान्तारे विषयोपभोगविमुखा ये केऽपि तेषां ततः
कान्ताश्लेषसुखोपरोधवचनं नैव प्रमाणं हि ते ॥ २९ ॥

तस्मात्त्वं श्रुतिस्मृतिविहितान्यपहाय कामागमविहितानि कर्माणि निर्विशङ्कमनुतिष्ठ । एष खलु परमो धर्मः । किं ब्रवीषि—'यथोपदिष्टं भावेन' इति । (सश्लाघम् ।) आस्स्व । अन्यतो गच्छामि । (इति परिक्रामितकेन ।) इयं खलु रत्नावली मदुपभुक्तयौवनारम्भा प्रणयकलहवतीव मामाघूर्णितया दृशा दर्शितैकस्तनोत्तरीया विलोकयति । तदेनां कपटगतादिभिरुक्तिभिः प्रलोभ्य कृतापराधमात्मानं मोचयामि । इतरथा पुनरियमनागममूलान्यागांसि संजनयति । (उपसृत्य सस्मितम् ।) रत्नावलि,

अमृतकरबिम्बमेतन्मुञ्चति किमिति प्रसादमात्मीयम् ।
कोणेन शोणिमानं कुवलययुगलं च किमिति संधत्ते ॥ ३० ॥

किमेवं मयि भाषमाणेऽप्यनालपन्ती तिष्ठसि ! किं ब्रवीषि—'कितव, काहं तवोत्तरं दातुम्' इति । (सानुस्मरणम् ।)

त्यज विलासिनि दासजने रुषं किमिति कोपकषायितमीक्षणम् ।
न विहितं नलिनायतलोचने तव निदेशविलङ्घनसाहसम् ॥ ३१ ॥

किं ब्रवीषि—'नाहं भाजनं विटजनकपटचाटुपाटवस्य । पश्य ।

अन्तर्गुम्भितगरलं बहिरपि पुण्ड्रेक्षुसारतो मधुरम् ।
कथमिव सत्यं मन्ये खलवचनं गगनकुसुमगन्धनिभम् ॥ ३२ ॥

तद्यथागतं गच्छ' इति । शृणु भामिनि,

सहजनिजचापलेन भ्रमरयुवा तत्र तत्र कृतकेलिः ।
कमलमुखि कस्य मान्यः कमलिन्या गाढरोषमवधूतः ॥ ३३ ॥

तत्कृतापराधमपि मां क्षमस्व । (इति पादयोः पतन् ।) किं ब्रवीषि—'तर्हि ताम्बूलं गृहीत्वा गच्छ' इति । (सहर्षं नाट्येन ताम्बूलं गृहीत्वा ।) सख्युत्सवसंभावनाय साधयामि । (इति यामितकेन दक्षिणतोऽवलोक्य ।) अयं खलु नवोढया कनकलतया सह कामन्दको भवनवेदिमधिवसति । तदेनमुपसृत्य नववधूविस्रम्भणमुपदेक्ष्यामि । (इति तथा कृत्वा ।) अये कामन्दक, इयं कनकलता भाग्येन ते पञ्चशरविजयदायिना वयसा परिष्क्रियते । तथा हि ।

आभोगेन कुचद्वयी विवृणुते संनाहमागामिनं
नेत्रे विस्तृतिशालिनी नवनवं कौटिल्यमभ्यस्यतः ।
चक्षुर्गोचरतामुपैति शनकैस्तन्वी च रोमावली
बाला सेयमुपैति मन्मथयशःसंजीवनं यौवनम् ॥ ३४ ॥

किं ब्रवीषि—'किं न संपद्यते भावपक्षपातेन' इति । वयस्य, यदुच्यते गन्तृच्छायां परित्यज्यागामिनीच्छाया गृहीतव्येति, तदिदं तव फलितम् । यतः ।

परिमुच्य पत्रलेखां परिणततारुण्यगर्वदुर्ललिताम् ।
अनुभवसि वीतबाल्यामेनामप्रौढयौवनां तन्वीम् ॥ ३५ ॥

अपि चायमेव कालः शृङ्गारसर्वस्वं रतिसुखमनुभवितुम् । किं ब्रवीषि—

'आश्लेषे सति संकुचद्वपुरियं बिम्बाधरस्य ग्रहे
व्यावृत्ताननपङ्कजा स्तनतटस्पर्शे कृतस्वस्तिका ।
नीवीमोक्षविधौ च निह्नुतिपरा नोपूरयत्यञ्जसा
मद्वाञ्छामधुना तथापि जनयत्यानन्दमन्यादृशम् ॥ ३६ ॥'

इति । वयस्य, इतः परं कर्तव्यमुपदिशामि ते ।

इक्षुलतामिव मधुरामिन्दुकलामिव मनोज्ञलावण्याम् ।
एनामनतिक्लिश्यां मधुकर इव भुङ्क्ष्व मालतीमालाम् ॥ ३७ ॥

आस्त्र । साधयामि । (इत्यन्यतोऽवलोक्य ।) इतः पुनरियमिन्दुमती कन्दुकताडनमाचरन्ती परिक्रीडते । (उपसृत्य ।) भद्रे इन्दुमति,

शश्वन्निःश्वसितानिलव्यतिकरव्याधूतबिम्बाधरं
स्वेदाम्भःकणमञ्जरीविलुलितव्याकीर्णचूडालकम् ।
उत्कम्पिस्तनलोलहारलतिकं क्लान्तावलग्नं वपुः
कुर्वन्कन्दुक एष कान्त इव ते धत्ते परां निर्वृतिम् ॥ ३८ ॥

विस्मयमानमुखी किं ब्रवीषि—'कुटिलमेव भाषितं भावस्य' इति । किमत्र चित्रं यदाचार्यस्य गुणो न शिष्यस्य । पश्य ।

पञ्चशरमोहनास्त्रं पङ्कजवनभागधेयपरिणामम् ।
उपदिशति लोचनं ते कामुकलोकस्य किमपि कौटिल्यम् ॥ ३९ ॥

किं च स्पृहयामि खलु दुर्ललितायास्तै कन्दुकाय । यतः ।

निपत्य चरणान्तिके करसरोजसंताडितः
पुनश्च सहसोत्पतन्नधरबिम्बलोभादिव ।
अधीरनयनं त्वया क्षणमिवायमालोकित-
स्तनोति मम कौतुकं पुलकितस्तनाश्लेषवान् ॥ ४० ॥

किं ब्रवीषि—'क्षणमिव मिथः संलप्य गम्यताम्' इति । (सस्मितम् ।) इदानीं खलु सख्युत्सवविलोकनकौतुकिना मया न कालः क्षेप्तव्यः । निवृत्तावेव सर्वं भविष्यति । आस्त्र । (इत्यन्यतः परिक्रम्य ।) कैषा सौधशिरोऽधिरोहिणी जननीनिष्कासितप्रियतममार्गावलोकिनी संलक्ष्यते । यैषा

आभाति मलयमरुता तरलितसंव्यानपल्लवा तरुणी ।
चारुतरनयनशफरा शम्बररिपुविजयवैजयन्तीव ॥ ४१ ॥

(निरूप्य ।) इयं खलु माधवीदुहिता वासन्तिका । (उपसृत्य ।) सखि वासन्तिके, सौधशिखरमधिरूढा किं करोषि। किं ब्रवीषि—'अभिनववसन्तावतारारमणीयस्य पश्यामि सौभाग्यमुपवनस्य' इति । (विहस्य ।)

कोमलस्तबकानम्रा चारुपल्लवरागिणी ।
माकन्दमिह वासन्ती संत्यज्य किमु शोभते ॥ ४२ ॥

सलज्जसिता किं तूष्णीं भवसि । किं ब्रवीषि—'जानामि ते मत्सुहृदि माकन्दे महाननुरागः' इति । किमेष धनलुब्धया जराग्रहगृहीतया जनन्या निष्कासितः । किं ब्रवीषि—'भवानेव जानाति परेङ्गितम्' इति । सखि वासन्तिके, काकोऽपि रटतु घटीयन्त्रं च प्रवर्तताम् । पश्य ।

आक्रन्दनं कामुककालरात्रिः करोतु तावज्जननी पिशाची ।
तथापि भूयादियमव्यपाया माकन्दसंभोगरसानुभूतिः ॥ ४३ ॥

साधयाम्यहम् । (इति परिक्रम्य दक्षिणतोऽवलोक्य ।) इयं पुनरन्यासङ्गकलुषा कलकण्ठी मेखलादामनि गलितभुजयुगलमधोमुखं धनमित्रमाहन्ति बकुलमालिकया । तदेनमनागसं विधास्यामि । अथवापराधितैव रमणीया । तथा हि ।

आकुञ्चितेन हननं नयनाञ्चलेन
काञ्चीगुणेन दृढसंयमनं च बाह्वोः ।
संताडनं बकुलमालिकया च लब्धं
भाग्यं कियद्विहितवान्धनमित्र एषः ॥ ४४ ॥

(उपसृत्य ।) सखि कलकण्ठि, किमपराद्धं धनमित्रेण । किं ब्रवीषि—'भाव, एष खलु मद्भगिनीमप्रौढयौवनां परभृतिकां मामेतिवादिनीमुपह्वरेऽनुभवन्नस्मत्सख्या मदलेखया दृष्टः' इति । (कर्णौ पिधाय ।) शान्तं पापं शान्तं पापम् । (अपवार्य ।) सखे, किमनुष्ठितं भवता । किं ब्रवीषि—

'तैस्तैर्वचोभिरनुनीय कथंचिदेनां
तालाकृतिस्तनयुगां तरलायताक्षीम् ।

आलिङ्ग्य गाढमधरं न पिबामि याव-
त्तावच्चकार हत दुर्विधिरन्तरायम् ॥ ४५ ॥

अहो साधुतरे संग्रामे चापस्य ज्याभङ्गः । साधु कृतं भवता । यतः ।

यद्यपि सहोदरीणां मधुकर इव नव्यचूतकलिकानाम् ।
उपभोगमुत्पलदृशां न विमुञ्चति विटजनो गुणग्राही ॥ ४६ ॥

किं ब्रवीषि—'तद्भवानेव मामनागसमाकलितप्रायश्चित्तं च विधत्ताम्' इति । (सस्मितम् ।) सखि कलकण्ठि, कस्य वा गच्छतः स्खलनं न संभवति । अथवा रागचपलेन यत्किंचिदसाधु चेष्टितवान् । तदिदानीमस्य दृढमुपदिशामि ।

वाचालमञ्जीरमनोहरेण पादेन पद्मोदरकोमलेन ।
वक्षःस्थले ताडनमाचरन्त्या वराङ्गि सोऽयं क्रियतामशोकः ॥ ४७ ॥

सखे धनमित्र, इतःपरं त्वमप्येतादृशस्य व्युत्क्रमस्याकरणाय

देवेन चित्तजनुषा मरुता मलयाद्रिजन्मना मधुना ।
शशिना च संप्रति भवाञ्शपथं सख्याः करोतु निःशङ्कम् ॥ ४८ ॥

एवं च कृत्वा प्रणिपातविधानेन व्यपनय कोपमस्याः । (सहर्षम् ।) अये, प्रियतमप्रणामेन व्यपगतरोषैव कलकण्ठी । तथाहि ।

परिणेतरि कुर्वति प्रणामं मुखमुन्मुक्तकलङ्कमायताक्ष्याः ।
भजते सुषमामभूतपूर्वामपनीहारमिवाम्बुजं प्रभाते ॥ ४९ ॥

सखे धनमित्र, सखि कलकण्ठि, इदानीमाशास्महे ।

अक्लिष्टयौवनोन्मेषविकस्वरविलासयोः ।
एधतां प्रेम युवयोरिन्दुचन्द्रिकयोरिव ॥ ५० ॥

आस्व । (इत्यन्यतोऽवलोक्य ।)

अर्धोरुकव्यवहितोरुनितम्बसीम्नां
कक्ष्यावबद्धकमनीयतरस्तनीनाम् ।
लावण्यकल्पितपरिष्कृतिरङ्गशाला-
मभ्येति वृन्दमरविन्दविलोचनानाम् ॥ ५१ ॥

(निर्वर्ण्य ।) एषा खलु पुरः समायान्ती तरुणजननयनानन्दचन्द्रिका बालचन्द्रिका । एनां हि

बालां तमालनीलां योग्यां तैलाभिषेकललिताङ्गीम् ।
तेजनतैलनिषिक्तां शङ्के शृङ्गारवीरखड्गलताम् ॥ ९२ ॥

तदिदानीं नाट्यशालां प्रविश्य सख्या गणदत्तेन क्रियमाणां नृत्यशिक्षां द्रष्टुमभिलषति मे हृदयम् । (रङ्गशालाप्रवेशं नाटयित्वा ।) अये, गणदत्त एवायं मदभिमुखमापतति । (उपसृत्य ।) सखे गणदत्त, परिष्वजस्व माम् । (इति नाट्येन परिष्वज्य ।) किं ब्रवीषि—'मुहूर्तमात्रं नृत्तशिक्षाविलोकनेन मां कृतार्थयतु भवान्' इति । तथा क्रियताम् । (सहर्षम् ।) सखे गणदत्त, अदृष्टपूर्वमस्या बालचन्द्रिकाया नृत्तशिक्षाचातुर्यम् । पश्य ।

हृद्यं मण्डलसौष्ठवं सुललितः प्रौढाङ्गहारक्रमो
न्यासस्तालल्यान्वितश्चरणयोर्मञ्जु क्वणन्नूपुरम् ।
तत्तद्भावविशेषसौरभजुषो रम्या दृशोर्विभ्रमाः
साकूतस्मितचारुवक्त्रकमलं श्राव्यं च गीतामृतम् ॥ ९३ ॥
यद्यस्ति नर्तकीनां वैशद्यं किमपि गीतविद्यायाम् ।
तत्किल विदग्धलोकः कथयति कनकस्य सौरभं जातम् ॥ ९४ ॥

किं ब्रवीषि—'भाव, परिग्रहेणैव नः प्रकाशते नृत्तविज्ञानम्' इति । (अपवार्य ।) सखि बालचन्द्रिके,

स्वेदाम्बुमौक्तिकपरिष्कृतफालदेशं
मन्दस्मिताङ्कुरितमन्मथबाहुदर्पम् ।
मात्राधिकश्वसितमाननपङ्कजं ते
रम्भोरु पातुमभिवाञ्छति मानसं मे ॥ ९५ ॥

किं ब्रवीषि—'किमात्मीयमात्मनो दुर्लभम्' इति । (गणदत्तं प्रति ।) सखे, सरसरमणीयोऽयं कालक्षेपः । तथापि सख्युत्सवसंभावनाय गन्तव्यम् । (इत्यन्यतः परिक्रम्य कर्णं दत्त्वा ।) अये, मकरन्दस्य गृहे कर्णमधुनिष्यन्दि हिण्डोलागानमाकर्ण्यते । तथा हि ।

संवाहिकाकरसमीरितरत्नडोला-
पर्यन्तबद्धमणिकिङ्किणिकानिनादैः ।
साकं समुल्लसति पङ्कजलोचनानां
संगीतमङ्कुरितपञ्चशरावलेपम् ॥ ९६ ॥

तदुपसृत्य संभावयामि । (इति तथा कृत्वा ।) अये, मन्दारिकामकरन्देन सार्धं वसन्तडोलाविहारोत्सवमनुभवति । इयं हि

दत्तैकबाहुपरिरम्भणमादरेण
वामेतरेण परिणाहवता स्तनेन ।
वक्षःस्थलं प्रियतमस्य निपीडयन्ती
डोलां गता विहृतिमातनुते मृगाक्षी ॥ ९७ ॥

(उपगम्य ।) अये, इयमवतितीर्षति मामवलोक्य मन्दारिका । अयि मन्दारिके, अलमलमतिसाहसेन ।

अवतरणसंभ्रमेण स्तनभरपरिणाहदूरखिन्नस्य ।
मध्यस्य चेद्विभङ्गो भविता भङ्गुरमनङ्गसर्वस्वम् ॥ ९८ ॥

किं ब्रवीषि—'वासन्तिकडोलाविहारोत्सवमनुभवामि' इति । साधु साधु । श्रवणमधुरं ते हि डोलागीतं श्रोतुमिच्छामि । कथं गायसि ।

[1]जअइ महुमासलच्छी जअइ अणङ्गस्स बाहुदप्पसिरी ।
जअइ णिसाअरबिम्बं जअइ अ मलअद्दिसंभवो पवणो ॥ ९९ ॥
[2]जअइ अ मज्झं वि किसं जहणं वि घणं थणं वि उत्तुङ्गम् ।
णअणजुअलं वि दीहं तत्तारिसमङ्गणाण सोभग्गम् ॥ ९० ॥

अहो गीतस्य माधुर्यम् ।

पुंस्कोकिलस्य ललितेन च पञ्चमेन
तन्त्रीरवेण मधुरेण च वल्लकीनाम् ।

---

१. जयति मधुमासलक्ष्मीर्जयत्यनङ्गस्य बाहुदर्पश्रीः ।
जयति निशाकरबिम्बं जयति च मलयाद्रिसंभवः पवनः ॥ [इति च्छाया].

२. जयति च मध्यमपि कृशं जघनमपि घनं स्तनमप्युत्तुङ्गम् ।
नयनयुगलमपि दीर्घं तत्तादृशमङ्गनानां सौभाग्यम् ॥ [इति च्छाया].

आनन्दमेति न तथा स्फुटरागभङ्ग्या
गीत्या तवाद्य करभोरु यथा मनो मे ॥ ६१ ॥

स्वच्छन्दं परिक्रीडस्व । साधयाम्यहम् । (कतिचित्पदानि गत्वा ।) इयं खलु विलासवती विटशेखरेण सह प्रवर्तिताक्षद्यूता विभाव्यते ।

मुखरितवलयं सलीलमक्षान्करकमलेन मुहुर्मुहुः क्षिपन्ती ।
तरुणजनमनांसि मोहयन्ती कलकरभोरु करोषि किं विहारम् ॥ ६२ ॥

किं ब्रवीषि—'भाव, इत उपविश्यतां क्षणमात्रम् । आवयोरक्षक्रीडितस्य साक्षी भवतु भवाञ्जयपराजययोः' इति । अथ कीदृशः पणबन्धः । अथवा वयस्यमेव पृच्छामि । वयस्य, कीदृशो वां पणबन्धः । किं ब्रवीषि—'पराजयवता सुरतेष्वधः शेतव्यम्' इति । साधु भणितम् । किं तु

अयमस्तु पराजयो महीयान्भवतः केवलमुत्सवोपमेयः ।
अवलम्बमिदं नतं मृगाक्ष्या वद वीरायितसंभ्रमे कथं स्यात् ॥ ६३ ॥

तत्सखीपराजयान्तरित एव विहारः क्रियताम् । अन्यतो गच्छामि । (इति परिक्रम्यावलोक्य प्रौढातपस्पर्शमभिनयन् ।) गगनकेशवकौस्तुभमणिर्भगवानम्बरमणिरलंकरोति मध्याह्नम् ।

उपैति शफरावलिः शिशिरशैवलाभ्यन्तरं
क्वथन्मधुमधुव्रतः कमलकाननं मुञ्चति ।
कपोतपरिपाटिकागृहविटङ्कमासेवते
मुखानि सुदृशामपि श्रमजलान्यलंकुर्वते ॥ ६४ ॥

इमामुद्यातपवेलां चन्द्रवतीमन्दिरोद्याने यापयामि । (परिक्रम्य ।) इयं खलु चन्द्रवती चन्द्रकान्तमणिवेदिकामधिवसति । (उपसृत्य ।) सखि चन्द्रवति,

मुग्धे मुखकमलं ते मौक्तिकनासाविभूषणोदारम् ।
अङ्कुरितामृतबिन्दोरिन्दोरिव बिम्बमातनोति मुदम् ॥ ६५ ॥

सखि, क्व गतः सखा मे वसन्तकः । किं ब्रवीषि—'मालतीनिमित्तं माधवसेनचन्द्रसेनयोरन्योन्यकलहमुपशमयितुं गतः' इति । सखि, दारुणतरतरणिकिरणतापो न व्यज्यतेऽस्मिन्भवनोद्याने । तथा हि ।

सीमा तत्तद्विटपिजनुषां संपदामार्तवीनां
योग्या शाला मलयमरुतामालयः शीतलिम्नाम् ।
गन्धाशाला मधुपसुदृशां केलिसौधं पिकानां
गेहोद्यानं दिशति नितरां नेत्रयोरुत्सवं मे ॥ ६६ ॥

(क्षणमिव स्थित्वा ।) चन्द्रवति, व्यतीतो मध्याह्नसमयः । त्वया च गम्यते खलु सख्युत्सवसंभावनाय । तत्संलापयामि । (परिक्रम्यावलोक्य ।) अये, कैषा

अजस्रविटकुट्टनस्थपुटितस्तनाभ्यन्तरा
नखव्रणकिणावलीविषमितं वपुर्बिभ्रती ।
करस्थगितपत्रिकापलितपाण्डुधम्मिल्लका
प्रसह्य जरती पुनस्तरुणमेकमाकर्षति ॥ ६७ ॥

अयि, तथैव सा लौकिकी गाथा वृद्धवारविलासिनी वानरी भवतीति । नूनमियं स्वदुहितरि नवमालिकायामलमल्लकमात्रावशेषमपगतवित्तं माधवदत्तमाकर्षति व्यवहारश्रवणाय करगृहीतपत्रा वेत्रवती । तदहमपि सभ्यानामन्तरे भवामि । (उपसृत्य ।) अयि वेत्रवति, किमिदानीं नारीजनोचितमाचर्यते दारुणं कर्म । किं ब्रवीषि—'अविलासिजनोचितमनेन माधवदत्तेनाचर्यते' इति । तत्कथय कोऽयमस्यानाचारः । किं ब्रवीषि—'षण्मासान्मदुहितरं नवमालिकां कलत्रीकृत्य न किंचिद्द्रव्यमर्पयति' इति । (अपवार्य ।) सखे, त्वदर्थमेव पक्षपाताद्वक्ष्यामि । (प्रकाशम् ।) शृणु वेत्रवति, वित्तहीनोऽयं माधवदत्तः । इयं च ते दुहिता षण्मासाननुभुक्ता । किं ब्रवीषि—'नायमवसरः परिहासस्य । पश्य तावदनेन दत्तां कलत्रपत्रिकाम्' इति । (इति नाट्येनादाय वाचयति—) 'स्वस्ति समस्तभुवनमोहने मन्मथनामनि संवत्सरे विजयनगरवासी माधवदत्तो वेत्रवतीदुहितुर्नवमालिकायाः कलत्रपत्रमर्पयति—

षण्मासानियमस्तु मे प्रणयिनी शश्वत्पणानां शतं
दास्यामि प्रतिमासमिन्दुधवलं धौतं दुकूलद्वयम् ।
माल्यं नूतनमन्वहं मृगमदं कर्पूरवीटीशतं
यच्चाभीप्सितमन्यथा पुनरसौ सर्वं च मे दास्यति ॥ ६८ ॥'

इति । भद्र माधवदत्त, न ह्यस्ति लिखित्वा व्यवहारः । तदुच्यतामुत्तरम् । किं ब्रवीषि—

'श्वश्रूपिशाचिकेयं मामतिसंधाय कृत्रिमोपायैः ।
आहूय धनिनमन्यं दुहितरमेनां तनोति तद्दयिताम् ॥ ६९ ॥

तदहमियमन्यगामिनीति दत्तान्यंशुकानि प्रत्याहर्तुमुद्यतोऽस्मि' इति । (सस्मितम् ।) सखे, कादाचित्कमपराधं क्षमस्व । भद्रे वेत्रवति, जामातरमाहूय भवनं प्रति गच्छ । उभौ किं ब्रूथ—'यदादिशत्यलङ्घनीयो भावः' इति । भो भोः सभासदो युवानः, सायं सख्युत्सवं संभावयितुं भवद्भिः संनिधातव्यम् । किं ब्रूथ—'तथा करिष्याम' इति । (पदान्तरे स्थित्वा साश्चर्यम् ।) अत्र हि

पश्चात्किंचिदिवोपसृत्य मिलितौ तिर्यङ्नमत्कंधरौ
शृङ्गाग्राहितलोहशृङ्खलखलात्कारक्रुधा मेदुरौ ।
कूटास्फालनघोरमस्तकयुगव्याघातभीमारवौ
कुर्वाते प्रहतिं विटप्रणिहितौ मेषौ सरोषाविमौ ॥ ७० ॥

अहो तिरश्चामप्यभिवर्धते परस्परं विरोधः । (कतिचित्पदानि गत्वा दक्षिणेन निरीक्ष्य ।) अत्र खलु

व्याधूतपक्षतिचलच्चरणावबद्ध-
शस्त्रक्षतिक्षरितलोहितदिग्धदेहाः ।
अन्योन्यतुण्डपरिघट्टनचारुचूडाः
सज्जन्त्यमी समरकर्मणि ताम्रचूडाः ॥ ७१ ॥

किमेतेषां परिमितबलानां समरावलोकनेन । (कतिचित्पदानि गत्वा ।) इह हि

आदौ संमृज्य पाणी क्षितितलरजसा गाढसंश्लिष्टकक्षौ
बाहू कल्पान्तमेघस्तनितकटुतरध्वानमास्फोटयन्तौ ।
निष्पिष्टोरःकवाटौ गिरिशिखरशिलानिष्ठुरैर्मुष्टिपातैः
कुर्वाते मल्लवर्यौ रणमखिलजगद्भीषणं गर्जयन्तौ ॥ ७२ ॥

(निर्वर्ण्य ।)

उद्धतनियुद्धभाजोर्निर्दयमुष्टिप्रहारनिष्ठुरयोः ।
अतिभीमसेनमनयोः प्राचण्ड्यं प्रेक्ष्य वेपते हृदयम् ॥ ७३ ॥

अन्यतो गच्छामि । (कर्णं दत्वा ।) अये, बधिरितहरिदन्तरो महान्कलकलः । नन्वयमेव चन्द्रवतीनिवेदितो मालतीनिमित्तं माधवसेनचन्द्रसेनयोरन्योन्यशस्त्रपातभीषणो महान्कलहः । अत्र हि

अन्योन्यखड्गपरिघट्टनजायमान-
ज्योतिःकणप्रकरतारकितान्तरिक्षम् ।
एतौ युगान्तकुपितान्तकदुर्निरीक्ष्यौ
रक्तोक्षितौ रचयतां रणकर्म वीरौ ॥ ७४ ॥

(क्षणमिव निर्वर्ण्य ।) अहो नृशंसमत्याहितं निपतितम् । यतः ।

प्रलयसमयकुप्यत्कालरुद्राट्टहासं
निजगलविवरोद्यत्क्ष्वेलनां निर्दधानः ।
कलयति रिपुकण्ठच्छेदपर्यन्तमग्रे
करधृतकरवालः साहसं चन्द्रसेनः ॥ ७५ ॥

इदानीं निःसपत्नं मालतीसुरतसुखमनुभवतु चन्द्रसेनः । अहं पुनरीदृशमत्याहितमवलोकयितुं न शक्नोमि । (अन्यतो गत्वा । एषा खलु चन्द्रसेनायाः शम्भली चतुरिका नाम ।

दशनक्षतदन्तुराधरोष्ठी नखनिर्भिण्णकपोलबाहुमूला ।
उपयाति विटान्विलोभयन्ती कबरीकल्पितभुक्तमुक्तमाल्या ॥ ७६ ॥

(उपसृत्य ।) हञ्जे चतुरिके, क्व प्रस्थितं भवत्या । किं ब्रवीषि—'भावं द्रष्टुमेव' इति । विदग्धः खलु वेशवाटजनोऽन्यत्कार्यमन्यत्रारोपयितुम् । किं ब्रवीषि—

'अभ्यस्य करणशिक्षां नैकमुखीं मन्मुखेन खलु बाल्ये ।
प्रौढः करोति हि भवानन्यत्रान्यत्र मधुप इव सक्तिम् ॥ ७७ ॥

अयं खलु भवान्नद्यां तीर्णायां नाविकमवमति(?)' इति । (सस्मितम् ।)

वल्गद्धनस्तनभराकुलितावलग्नं
व्यालोलकुण्डलकलापविकीर्णमाल्यम् ।
विस्रब्धचाटुशतजल्पमनल्परागं
नो विस्मरामि दयिते पुरुषायितं ते ॥ ७८ ॥

किं ब्रवीषि—'क्व गम्यते भावेन' इति । सख्युत्सवाय गच्छामि ।
(इत्यन्यतोऽवलोक्य ।) मत्तकोकिलातनया मञ्जुभाषिणी
आलिङ्ग्य स्तनमण्डलाहितमुखीमाकल्पितां वल्लकीं
तन्त्रीं तारनिनादिनीं नखमुखैरास्फालयन्ती मुहुः ।
मग्नं मन्मथरागसागरजले यूनां मनः कुर्वती
तत्तद्रागविशेषसौरभवतीं गाथामियं गायति ॥ ७९ ॥
(क्षणमिव स्थित्वा ।) हृदयहारिणा गीतेन विवशीकृतोऽस्मि ।
मुकुलयति पुलकमङ्गे मुद्रयति मनांसि मोहमातनुते ।
किंवा प्रथयति सौख्यं किं किं न करोति गीतमबलानाम् ॥ ८० ॥
(ऊर्ध्वमवलोक्य ।) अये, परिणतप्रायो दिवसः ।
क्रीडादिग्गजहस्तवेगविधूतव्योमापगाम्भःपत-
च्छोणाम्भोजविडम्बिपश्चिमदिशस्ताटङ्कचक्रोपमम् ।
एतत्पक्वदिनद्रुमच्युतफलच्छायं शनैरम्बरा-
द्धून्धूकच्छविबिम्बमम्बरमणेरस्ताद्रिमालम्बते ॥ ८१ ॥

यद्यपि हृदयहारि संगीतम्, तथापि सख्युत्सवसमयः समतिक्रामति ।
(इति परिक्रम्य ।) इदं खलु प्रियसख्याः काममञ्जर्याः प्रारब्धमहोत्सवं सद-
नमालक्ष्यते । तत्सखीं संभावयामि । (अन्तःप्रवेशं नाटयित्वा साश्चर्यम् ।) इदं
किलाविरताहन्यमानमङ्गलमृदङ्गनिनदजनितकर्णपारणम्, आरणन्मणिनू-
पुरवाचालचरणशम्भलीजनमोदमानकमलमुकुलकह्लारमालिकापरिमलवाहि-
मन्दपवनम्, अभ्यन्तरमन्दिरोपविष्टसैरन्ध्रिकावशसंपद्यमानप्रसाधनोपकर-
णम्, अतित्वरितचेटीसमारोप्यमाणदीपिकाचक्रवालनिह्नुतसायंतनसमयस-
न्तमसबन्धम्, अधिराज्यदेवताभिरिवानङ्गस्य मोहनविद्याभिरिव चक्षुषा-
मनवद्यसर्वाङ्गीभिरभिनववसन्तनवकुसुमाङ्गरागधारिणीभिरङ्गनाभिरलंकृतम्,

अतिविदग्धविटविदूषकपीठमर्दकविलासिसंकुलमुत्सवायतनम् । (निर्वर्ण्य ।) एषा खलु काममञ्जरी संसारतरुमञ्जरीदुहितरं नितरामलंकृत्य भद्रपीठमारोपयति । प्रकृतिरमणीयेयमनङ्गमञ्जरी प्रथमार्तवमहोत्सवेन भासते नितराम् । तथा हि ।

कामं स्वभावललिता मधुपकुलामोददायिनी लतिका ।
नयनोत्सवं विधत्ते लब्ध्वा प्रथमर्तुसंभवां लक्ष्मीम् ॥ ८२ ॥

एषा मङ्गलमज्जनेन विशदा पट्टांशुकोद्भासिनी
कस्तूरीतिलकातिरम्यवदना पुष्पाभिरामालका ।
काश्मीराकलिताङ्गरागरुचिरा कह्लारमालावती
मूर्ता शम्बरवैरिणो विजयते साम्राज्यलक्ष्मीरिव ॥ ८३ ॥

(सर्वतो दत्तदृष्टिः ।) अहो सकलोऽपि संमिलितः समयः । (परिक्रम्य ।) अये, सखी काममञ्जरीयमभिमुखमापतति निर्भरानन्दा । तदेनामुपसर्पामि । (तथा कृत्वा ।) सखि काममञ्जरि, संसारतरुमञ्जरीदुहितुरनङ्गमञ्जर्याः प्रथमार्तवमहोत्सवेन वर्धसे । किं ब्रवीषि—'भाव, समागमादुत्सवः संपन्नः' इति । सखि, पश्य । असाधारणः खल्वावयोरुत्सवः ।

एतस्यामुदितायामिन्दुकलायामिवातिललिताङ्ग्याम् ।
अनुभवतु बन्धुलोको मकरालय इव महान्तमानन्दम् ॥ ८४ ॥

(प्राचीमवलोक्य ।) अये, उदितभूयिष्ठ एव भगवानोषधीरमणः । तथा हि ।

त्रिभुवनविजयोद्यतस्य कर्तुं धवलमिवातपवारणं स्मरस्य ।
उदयशिखरिकन्दरान्तरालादुडुपतिमण्डलमेतदुज्जिहीते ॥ ८५ ॥

सखि काममञ्जरि, लब्धसकलमनोरथानां निशि किमतःपरेणानन्देन । तथापीदमस्तु भरतवाक्यम् ।

वेधोविष्णुमहेश्वरप्रभृतिभिः संभाविता निर्जरै-
राज्ञा शम्बरशासनस्य महती लोकत्रये दीव्यतु ।
सत्स्वन्येषु रसेषु चास्तु विजयी शृङ्गार एको रसः
संनाहि स्तनमण्डलं मृगदृशां तारुण्यमुज्जृम्भताम् ॥ ८६ ॥

समाप्तोऽयं ग्रन्थः ।

विक्रेयानि संस्कृतपुस्तकानि ।

पातञ्जलमहाभाष्यम् ।

(नवाह्निकम् ।)

कैयटप्रणीतप्रदीपेन नागेशकृतोद्द्योतेन पायगुण्डेकृतछायया च परिवृतम्। श्रीवाराणस्यादिनगरेषु विहितमुद्रणमपीदं नवाह्निकभाष्यमविभक्तविषयतया साहायकमिवाचरति दुर्बोधतायां विषयगाम्भीर्यस्येत्याकर्ण्य विविधविचक्षणमुखात्, संजातसुविभक्तमुद्रणोत्साहेन मयैतत् पूर्वपक्षि—सिद्धान्त्येकदेशि—सिद्धान्त्युक्तिभिस्तदन्तर्गतैरवान्तरविषयैश्च संविभज्य, संयोज्य च यथास्वं शिरोलेख्ये—(हेडिंग)न संविभक्तविषयसूचकेन, विभूष्य च कृतसंविभागप्रदीपोद्द्योतयोरधस्तात् संनिवेशनेन, मुद्रितम् । येनास्यानतिशिक्षिता अपि रहस्यमवगच्छेयुः । पायगुण्डे इत्युपाभिधनागेशछात्रप्रवरकृतछायायास्तु प्रथमोऽयं मुद्रणशालाप्रवेशः । इयमत्र टिप्पणीरूपं प्रतिलम्भिता. मू. ४ मा. ।=

वेदषडंगानि.

नाम—१ शिक्षा, २ ज्योतिषं, ३ छंदः, ४ निघंटुः, निरुक्तं च—पूर्वषट्कं, उत्तरषट्कं, ५ आश्वलायनश्रौतसूत्रं—पूर्वषट्कं, उत्तरषट्कं, ६ अष्टाध्यायी(सूत्रपाठः). किं. १। ट. ख. ।

शिक्षादिवेदांगचतुष्टयम्.

शिक्षा, ज्योतिषं, छंदः, निघंटुः. किं. ०= ट. ख. ०॥

आश्वलायनगृह्यसूत्रम्.

चतुरध्यायात्मकम्. किं. ०= ट. ख. ०॥

भवतां कृपाकाङ्क्षी,

तुकाराम जावजी—निर्णयसागराध्यक्षः,

3558 पो० कालकादेवी (मुम्बापुरी).